**दिनाङ्क :- 12.07.2024**
**प्रात: - 06: 55**

## अथ वार्ता:

### नीत्यायोग:/प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयाय-व्यय-सङ्कल्पपत्रस्य प्रस्तुतेः प्राक् नीत्यायोग-भवने प्रमुखैः अर्थशास्त्रिभिः सह उवेशनम् अकरोत् । उपवेशनेऽस्मिन् वित्तमन्त्री-निर्मलासीतारमणः, नीत्यायोगस्य उपाध्यक्षा सुमनबेरी, प्रधानमन्त्रिणः प्रमुखसचिवः पी. के. मिश्रः, वरिष्ठा: अर्थशास्त्रिणः कतिपया: अर्थशास्त्रविशेषज्ञाश्च समुपस्थिता: आसन् । संसदः आय-व्यय-पत्रक-सत्रं जुलाईमासस्य द्वाविंशति-दिनाङ्कतः समारभते । तत: आगामिदिवसे वित्तमन्त्री निर्मलासीतारमण: लोकसभायां सत्रस्यास्य केन्द्रीयम् आय-व्यय-सङ्कल्प-पत्रं प्रस्तोष्यति । ध्यातव्यम् अस्ति यत् नरेन्द्रमोदिनः तृतीयकार्यकालस्य इदं प्रथमं वित्त-सङ्कल्प-पत्रं भविष्यति ।

### जयशंकर:/बिम्स्टेक्-सम्मेलनम्

विदेशमन्त्री डॉ. एस्. जयशंकरः उक्तवान् यत् भारताय बिम्सटेक् तस्य 'प्रतिवेशिप्रथमः', 'एक्ट ईस्ट', 'सागर:' चेत्येतेषां संकल्पानां प्रतिनिधित्वं करोति । डॉ.जयशंकरः ह्य: नवदिल्ल्यां **बंगालखाति**: इति विषयं केन्द्रीकृत्य आयोजिते द्वितीये सम्मेलने बहु-क्षेत्रीय-प्राविधिक्यार्थिक-सहयोगाय प्रतिबद्धानां विदेशमन्त्रिणाम् उपवेशने भाषामाण: आसीत् । सः प्रोक्तवान् यत् प्रत्येकं प्रयासः **बंगाल-खाति**: इत्यस्मिन् विषये अवधातुं क्रियते, यत्र सहयोगात्मक-क्षमता चिरकालादप्राप्या वर्तते । डॉ. जयशंकरः पुनः अकथयत् यत् विदेश-मन्त्रिणां संदेशः स्पष्टः स्यात् यत् ते सर्वे बंगाल-खाति-क्षेत्रस्य देशानां मध्ये नवोर्जायै, नवसंसाधनाय सहयोगाय च प्रतिबद्धाः सन्ति । सः प्रोक्तवान् यत् अस्माकं समक्षं क्षमता-निर्माणार्थिक-सहयोग-सदृशानि दीर्घकालिक-लक्ष्याणि सन्ति। डॉ.जयशंकरः इदमपि अकथयत् यत् रिट्रीट-इत्यस्य प्रथमे भागे सम्पर्क-संस्थानिर्माण-व्यापार-व्यवसायान्तरिक्ष-सहयोग-स्वास्थ्याधारभूत-संरचना-क्षमतानिर्माणेत्यादिषु विषयेषु चर्चा करिष्यते ।

### सर्वोच्चन्यायालय:/नीटपरीक्षा

सर्वोच्च-न्यायालयेन नीट-स्नातक-परीक्षा-प्रकरणे न्यायिक-श्रवण-प्रक्रिया अस्य मासस्य अष्टादशदिनाङ्कं यावत् स्थगिता । भारतस्य मुख्यन्यायाधीशस्य डी.वाई.चन्द्रचूडस्य अध्यक्षतायां पीठेन, केन्द्रसर्वकारेण एनटीए इत्यभिकरणेन च न्यायालये प्रख्यापिते प्रत्युत्तरे विपक्षिदलानां प्रतिक्रियायै एतत् स्थगनं कृतमस्ति । अवधेयं यत् शीर्षन्यायालये ह्य: विवादास्पदं नीट-स्नातक-प्रवेश-परीक्षया सम्पृक्तासु याचिकासु श्रवणप्रक्रिया सुनिश्चितासीत् । एतासु मईमासस्य पञ्चमदिनाङ्के जातायां परीक्षायाम् अनियमितता-कदाचारयोः आरोपं प्रतिपादयन्त्यः पुनः परीक्षायाः च याचिकाः सम्मिलिताः आसन् । बुधवासरे प्रस्तुते एकस्मिन् प्रतिवेदने केन्द्रेण प्रोक्तं यत् सर्वोच्चन्यायालयस्य निर्देशानुसारं शिक्षामन्त्रालयेन नीट-स्नातक-परीक्षायाः परिणामस्य व्यापकविश्लेषणाय आईआईटी-मद्रासः सम्प्रार्थितः वर्तते ।

### उत्तरप्रदेश-जलाप्लावनम्

भूरिशः वृष्ट्या उत्तरप्रदेशस्य कतिपयभागाः जलमग्नाः जाताः। जलाप्लावनात् रक्षणाय आपदुद्धाराभियाने सेना नियोजितास्ति ।

**।। इति वार्ता: ।।**